वाद्याद्यैरन्विता नैव कर्त्तव्येयं विचक्षणैः ॥”
इति सङ्गीतदामोदरः ॥

(गावोऽनेका यत्र तिष्ठन्ति यत्र। गो+स्था+घञर्थे कः। ततः “अम्बाम्बगोभूमीति।” ८।३।९७। इति षत्वम्।) संलापः। इति मेदिनी। ठे। ४॥ (यथा, पञ्चतन्त्रे। १।४००।
“एवमनुष्ठिते चत्वारोऽपि ते एकस्थाने विहारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति ॥”) गोष्ठवर्गः। यथा, चाणक्ये।
“विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥”
(यथा च राजेन्द्रकर्णपूरे। ४७।
“हत्वा वेलापुलिनवलीपल्लवग्रासगोष्ठीं
दिङ्मातङ्गाः सममथ सरिन्नाथपाथः पिबन्ति ॥”)

**गोष्ठीपतिः**, पुं, (पातीति पतिः। गोष्ठ्याः गोष्ठवर्गस्य सभाया वा पतिः।) गोष्ठवर्गपालकः। सभापतिः।
अथ ब्राह्मणगोष्ठीपतिलक्षणं यथा — [दिता
“नानाशास्त्रविशारदै रसिकता सत्काव्यसम्मो-
निर्द्दोषैः कुलभूषणैः परिमिता पूर्णा कुलज्ञैरपि।
श्रीमद्भागवतादिकारणकथाशुश्रूषयान्विता
गत्वाभीष्टमुपैति यद्गुणिजनो गोष्ठी हि सा चोच्यते ॥”
एवम्भूता गोष्ठी तस्याः पतिः। अपि च।
“कुलीनाः श्रोत्रियाः सर्व्वे यस्यान्नं भुञ्जते सदा।
कुलीनाय सुतां दत्त्वा स गोष्ठीपतिरुच्यते ॥”
तद्यथा। गाङ्गवंशे लक्ष्मीकान्तमजुमदारः १ मुखवंशे मदनभट्टाचार्य्यः २ तद्वंशे गन्धर्व्वरायः ३ बन्द्यवंशे शुभराजखानवंश्यः ४ प्रट्टवंशे अनन्तभट्टाचार्य्यः ५ एते प्राचीनाः आधुनिका बहवः सन्ति ॥ * ॥
कायस्थगोष्ठीपतिलक्षणं यथा,—
“नीतिज्ञः कुलकर्म्मठः स्थितिमतां मान्योऽपि धर्म्मान्वितः
कार्य्याकार्य्यविलोकनैः कुलभृतां सम्मानदानोद्यतः।
योद्धा यः कुलसंविदां कुलसुधीः सन्मौलिकानां तथा
सद्वंशप्रभवः क्षितौ सुविदितो दाता स गोष्ठीपतिः ॥”
अथ कायस्थगोष्ठीपतिगणना।
“आदौ द्वादशपर्य्यये समभवद्दानेन गोष्ठीपतिः
सत्कीर्त्तिश्च सुबुद्धिखानतनयः श्रीमन्तरायः कृती। १।
संजातस्तदनन्तरं गुणधरो गण्ये च पर्य्यायके
खेच्छातो हि पुरन्दरः कुलभवः खानः सदा दानतः ॥ २ ॥
पर्य्याये च चतुर्दशे समभवत् पौरन्दरः केशवः
खानः सन्ततदानतो हि विलसत्कीर्त्तिर्धरामण्डले ॥ ३ ॥
नानावित्तविसर्जनेन जनितप्रोत्फुल्लकीर्त्तिः क्षितावासीत् पञ्चदशे तदात्मजकृती श्रीलक्ष्मणविश्वासखान् ॥ ४ ॥
ततः षोडशे पर्य्यये दानशालः
कुलीनालिमाली दयारामपालः ॥ ५ ॥
ततस्तत्सुतः पर्य्यये सर्व्ववाणि-
च्यानाथगण्येऽभवत् पुण्यराशिः ॥ ६ ॥
ततः पर्य्ययेऽष्टादशे तत्तनूजः
समाहूय भूयोऽर्च्चितार्थिव्रजो यः।
सदा सत्कथालापसंजाततोषः
कुलीनौघपूजापरोऽयं सुभाषः ॥ ७ ॥
आसीत् किङ्करसेननामसुकृती यो मौलिकेष्वाग्रणीः
पर्य्याये परिपूजितार्थिनिचये चैकोनविंशे हि सः।
सद्गोष्ठीपतिपालवंशतनयापाणिग्रहेणात्मनो
दानेनापि च मेलिकाटिरपरो गोष्ठीपतिः प्राथमः ॥ ८ ॥
दानेनातिवदान्यतादिगुणतो निःसीमपुण्यैश्च यो
गोपीसिंहचतुर्धुरीणसुकृती विंशे हि पर्य्यायके।
यस्मात् किङ्करसेनवंशतनयापाणिग्रहादागतः
सोऽप्यासीद् भुवि मेलिकाटिरपरो गोष्ठीपतिः सत्स्तुतिः ॥ ९ ॥
पर्य्याये पुनरेकविंशक इह ख्यातः समास्कन्दे
गोपीसिंहचतुर्धुरीणकुलजो यो रामकान्तः कृती।
धन्यो गण्यसुपुण्यजन्मयशसा गोष्ठीपतेरग्रणी-
र्दानैः कर्णं इवातिधैर्य्यपयसां रत्नाकरश्चापरः ॥ १० ॥
द्वाविंशे किल पर्य्ययेऽतिनियतेस्वस्यात्मजासंगमात्
स्वस्यैवात्मसुपुण्यदत्तकतनूजस्य च श्रीमतः।
गोपीभीषणसंज्ञकस्य तनयद्वारा च गोष्ठीपतिः
सम्भूतो नवकृष्णभूपतिवरः सन्मेलिकाटिः क्षितौ ॥ ११ ॥
तावच्छुक्लकनिष्ठमध्यमकुलोद्भूतां सुतीयोद्भवान्
बहुभ्रातृनपि तावतोऽथ भजना बहुक्रमागादरात्।
सद्गोष्ठीपतिकारकानतितराधीनान् कुलीनान् समाहूयाच प्रवरांस्तथाच सहजान् पुत्त्रांस्तथा कोमलान् ॥
वित्तैर्दानगणैर्मतिप्रकृतिभिश्चान्यैस्त्रयोविंशके
पर्य्यायेऽतितरां प्रपूज्य परमाकारादान्वितः श्रीयुतः।
गोपीमोहनदेववंशतिलको गोष्ठीपतिः क्ष्मापतिर्जातः संप्रति भूमिदेववटकानाथाधमादच्युतिः ॥” १२ ॥
इति दक्षिणराढीयकायस्थकुलाचार्य्यकारिका ॥
अथ वैद्यानां गोष्ठीपतिर्यथा,—
“विप्रेभ्यः प्रियभोज्यवस्तुवसनं छत्रासनं भूषणं
धामा भूमिसुरञ्जमा गजगवा धान्यानि रत्नानि च।
गावो गाव उदारमन्दिरचयो वाच्याश्च दत्ताः सदा
साधुख्यातिकुटुम्बसज्जनगणाः संप्रीणिता येन च ॥
गौड़क्ष्मापतिना य एव भिषजां श्रेष्ठोऽभिषिक्तः कृती
नानाशास्त्रविशारदः शुभमतिर्व्वाग्मी चिकित्सापटुः।
तस्मात् प्राप गजं तुरङ्गकनकच्छत्रं रत्नं धनं
सोऽभूत् सेनविनायको बहुगुणैरम्बष्ठगोष्ठीपतिः ॥
वैनायकेषु सर्व्वेषु भास्करः श्रेष्ठ ईरितः।
गोष्ठीपतितया ख्यातः स वैद्यैः पूजितोऽग्रत ॥”
इति भरतमल्लिककृतकुलपञ्जिका ॥

**गोष्पदं**, क्ली, (गोः पदम्। यद्वा, गावः पद्यन्ते गच्छन्ति यस्मिन् देशे। “गोष्पदं सेवितासेवितप्रमाणेषु।” ६।१।१४५। इति सुट् षत्वञ्च।) गोसेवितस्थानम्। गोखुरप्रमाणम्। इत्यमरः। ३।३।६३॥ (यथा, महाभारते। ६।८।३७।
“भीष्मद्रोणार्णवं तीर्त्त्वा कर्णपातालसम्भवम्।
मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम् ॥”)
तथा विश्वो मेदिनी च।
“गोष्पदं गोपदश्वभ्रे गवाञ्च गतगोचरे ॥”
(गवासेवितारण्यादि। इति सिद्धान्तकौमुदी ॥)

**गोसः**, पुं, (गां जलं स्यति नाशयतीति। षो च नाशने+“आतोऽनुपसर्गे कः।” ३।२।३। इति कः।) बोलः। उषःकालः। इति मेदिनी। से। ३॥

**गोसङ्ख्यः**, पुं, (गाः सञ्चष्टे इति। चक्षि ङ व्यक्तौ +“चक्षिङः ख्याञ्।” २।४।५४। इति ख्याञ्, ततः “समिख्यः।” ३।२।७। इति कः। यद्वा, गवां संख्या बहवो गाव इत्यर्थः विद्यते यस्य। समासे पुंवद्भावः।) गोपः। इत्यमरः। २।९।५७॥

**गोसङ्गः**, पुं, (गोभिः सङ्गो मिलनं यस्मिन् काले। प्रत्यूषकाले हि गावो गोष्ठगमनाय निर्गच्छन्तीति प्रसिद्धिः। यद्वा गौः सूर्य्यकिरणं तेन सङ्गो यस्मिन्।) प्रत्यूषः। इति भूरिप्रयोगः॥

**गोसदृक्षः**, पुं, (गोः सदृक्षस्तुल्यः। गोसदृशाकारत्वादस्य तथात्वम्।) गवयः। इति हेमचन्द्रः॥

**गोसन्दायः** पुं, (गां सन्ददातीति। सम्+दा+अण्।) गोदानकर्त्ता। इति व्याकरणम्॥

**गोसम्भवा**, स्त्री, (गोरिव सम्भवो लोमादिरूपा कृतिर्यस्याः।) श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ (सम्भवत्यस्याः इति सम्भवा उत्पत्तिकारणम्। गौः सम्भवो यस्याः।) गोजाते त्रि॥

**गोसर्गः**, पुं, (गवां सर्गो वनगमनाय मोचनं यद्वा गवां सूर्य्यकिरणानां सर्गो विसृष्टिः यस्मिन्।) प्रभातम्। इति हारावली। १६१॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।
“गोसर्गे चार्द्धरात्रे च तथा मध्यन्दिनेषु च।”)

**गोसवः**, पुं, (गौः सूयते पीड्यते हिंस्यते यत्र। सु ञ् पीड़ायाम्+“ऋदोरप्।”३।३।५७।) इति अप्।) गोमेधयज्ञः। इति जटाधरः॥ (यथा, मनुः। ११।७४।